# Agastikritam Skanda Stotram

# અગસ્તિકૃતં સ્કન્દસ્તોત્રમ્

## Document Information

Text title : Agastikritam Skanda Stotram

File name : agastikRRitaMskandastotram.itx

Category : subrahmanya, skandapurANa, stotra, aShTaka

Location : doc_subrahmanya

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | pUrvakhaNDa | adhyAya 25/10-17||

Latest update : June 9, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 9, 2025

*sanskritdocuments.org*

# અગસ્તિકૃતં સ્કન્દસ્તોત્રમ્

અગસ્તિરુવાચ ।
નમોઽસ્તુ વૃન્દારકવૃન્દવન્દ્ય પાદારવિન્દાય સુધાકરાય ।
ષડાનનાયામિતવિક્રમાય ગૌરીહૃદાનન્દસમુદ્ભવાય ॥ ૧॥

નમોઽસ્તુ તુભ્યં પ્રણતાર્તિહન્ત્રે કર્ત્રે સમસ્તસ્ય મનોરથાનામ્ ।
દાત્રે રથાનાં પરતારકસ્ય હન્ત્રે પ્રચણ્ડાસુરતારકસ્ય ॥ ૨॥

અમૂર્તમૂર્તાય સહસ્રમૂર્તયે ગુણાય ગુણ્યાય પરાત્પરાય ।
અપારપારાય પરાપરાય નમોઽસ્તુ તુભ્યં શિખિવાહનાય ॥ ૩॥

નમોઽસ્તુ તે બ્રહ્મવિદાંવરાય દિગમ્બરાયામ્બરસંસ્થિતાય ।
હિરણ્યવર્ણાય હિરણ્યબાહવે નમો હિરણ્યાય હિરણ્યરેતસે ॥ ૪॥

તપઃસ્વરૂપાય તપોધનાય તપઃફલાનાં પ્રતિપાદકાય ।
સદા કુમારાય હિમારમારિણે તૃણીકૃતૈશ્વર્યવિરાગિણે નમઃ ॥ ૫॥

નમોઽસ્તુ તુભ્યં શરજન્મને વિભો પ્રભાતસૂર્યારુણદન્તપઙ્ક્તયે ।
બાલાય ચાબાલપરાક્રમાય ષાણ્માતુરાયાલમનાતુરાય ॥ ૬॥

મીઢુષ્ટમાયોત્તરમીઢુષે નમો નમો ગણાનાં પતયે ગણાય ।
નમોઽસ્તુ તે જન્મજરાતિગાય નમો વિશાખાય સુશક્તિપાણયે ॥ ૭॥

સર્વસ્ય નાથસ્ય કુમારકાય ક્રૌઞ્ચારયે તારકમારકાય ।
સ્વાહેય ગાઙ્ગેય ચ કાર્તિકેય શૈવેય તુભ્યં સતતં નમોઽસ્તુ ॥ ૮॥

ઇત્થં પરિષ્ટુત્ય સ કાર્તિકેયં નમો નમસ્ત્વિત્યભિભાષમાણઃ ।
દ્વિસ્ત્રિઃપરિક્રમ્ય પુરો વિવેશ સ્થિતો મુનીશોપવિશેતિ ચોક્તઃ ॥ ૯॥

ઇતિ શ્રીસ્કાદપુરાણે કાશીખણ્ડે પૂર્વાર્દ્ધે પઞ્ચવિંશાધ્યાયાન્તર્ગતં
અગસ્તિકૃતં સ્કન્દસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । કાશીખણ્ડ । પૂર્વખણ્ડ ૧ । અધ્યાય ૨૫/૧૦-૧૭॥

skandapurANa . kAshIkhaNDa . pUrvakhaNDa 1 . adhyAya 25/10-17..

Proofread by PSA Easwaran

*Agastikritam Skanda Stotram*

pdf was typeset on June 9, 2025

Please send corrections to *sanskrit@cheerful.com*